# Bhavopaharah

# ભાવોપહારઃ

## Document Information

Text title : bhAvopahAraH

File name : bhAvopahAraH.itx

Category : shiva

Location : doc_shiva

Author : chakrapANinAtha

Transliterated by : Aaditya Kalyanaraman

Proofread by : Aaditya Kalyanaraman

Latest update : November 10, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 10, 2023

*sanskritdocuments.org*

# ભાવોપહારઃ

ॐ નમોઽનન્તશક્તયે શિવાય ।

અથ ભાવોપહારઃ ।

શ્રીમચ્ચક્રપાણિનાથવિરચિતઃ

(શ્રી ભટ્ટજ્યોગ્દેવાત્મજભટ્ટરમ્યદેવાચાર્યવિરચિત મઙ્ગલશ્લોકાઃ)

સ્વવિમર્શવિકચકાનન-
સમુન્મિષદ્વિષયકુસુમસન્તત્યા ।
કરણેશ્વરીભિરભિતઃ
સમર્ચિતો બોધભૈરવો જયતિ ॥ ૧॥

વિમર્શમય્યા નિજશક્તિદેવ્યા
વિશ્વપ્રથાભૈરવક્લૃપ્તપૂજઃ ।
જયત્યકામોદિતરશ્મિરૂપ-
સ્વશક્તિપુઞ્જાત્મજ ચક્રનાથઃ ॥ ૨॥

ક્રમાક્રમક્રિયાક્રાન્તિ-
વ્યતિક્રમનિકૃન્તનમ્ ।
દેવં ચક્રં શ્રયે ક્રીડા-
ક્રોડીકૃતકૃતાન્તકમ્ ॥ ૩॥

અથ સ્તોત્રં -
ॐ નમઃ સૂર્યકલાજાલકાલદેહાપહારિણે ।
આધારાધેયપીઠાય ભવાયાભવદાયિને ॥ ૧॥

નમઃ શિશુનિશાકાન્તકલાકમલમાલિને ।
પરમાનન્દદેહાય શિવાયાવ્યક્તમૂર્તયે ॥ ૨॥

નમઃ પાશૌઘસઙ્ઘટ્ટલયવિશ્લેષકાઇરિણે ।
મન્ત્રગર્ભોદરસ્થાય હરાય પરમાતને ॥ ૩॥

યદ્યપિ ત્વં ગુણાતીતો વાકતેરપ્યગોચરઃ ।
તથાપ્યા હૃદયાત્સ્તોતુમુદ્યતા વાક્સદા મમ ॥ ૪॥

અતિભક્તિરસાવેશવિવશા વિશ્વતો મુખ ।
ત્વત્પ્રેરિતા યતો નાથ નાપરાધોઽસ્તિ મે ક્વચિત્ ॥ ૫॥

ત્વત્પાદાબ્જરજઃ પૂતચિતાભૂતિવિભૂષિતાત્ ।
ગૃહાણ મત્તઃ શ્રીકણ્ઠ ? ભાવપૂજામકૃત્રિમામ્ ॥ ૬॥

હૃત્પુષ્કરાખ્યે સ્નાત્વાન્તસ્તીર્થે યોગિનિષેવિતે ।
સમ્બોધધૌતવસનઃ શ્યામકણ્ઠં યજામ્યહમ્ ॥ ૭॥

પ્રભૂતભૂતસમ્ભૂતશોણિતૈરર્ઘભાજનમ્ ।
ક્રિયતે તે મહાકાલ કાય કઙ્કાલકન્દલે ॥ ૮॥

યદ્યદ્વિકલ્પના જાલં બાહ્યાર્થપ્રતિપત્તયે ।
તત્તદ્દ્વારાધિપકુલં તવ પૂજ્યં મનસ્વિભિઃ ॥ ૯॥

અશેષાવરણોન્મુક્તગુપ્તસૌષુપ્તમણ્ડલે ।
પૂજ્યસે નગજાકાન્ત ! ગ્રહણે ચન્દ્રસૂર્યયોઃ ॥ ૧૦॥

હાનાદાનોદયારમ્ભસદસદ્વિભ્રમોજ્ઝિતમ્ ।
જ્ઞપ્તિમાત્રપ્રતિષ્ઠાનમાસનં ત્રિજગત્પતે ॥ ૧૧॥

મૂર્તિદાનમનાભાસશક્તિભાસોપબૃંહિતમ્ ।
તુર્યપીઠપ્રતિષ્ઠાનં વિતરામિ જગત્પતે ॥ ૧૨॥

દિક્કાલદેશકલનાકલઙ્કોજ્ઝિતચેતસઃ ।
કઃ કરોતિ બુધઃ સ્થાણોરાહ્વાનાદિવિસર્જનમ્ ॥ ૧૩॥

સૂર્યશીતાંશુનેત્રાભ્યાં મથિત્વા શક્તિવારિધિમ્ ।
પરામૃતરસાભ્યઙ્ગં શિવાય વિનિવેદયે ॥ ૧૪॥

ઇન્દ્રિયેષ્વિન્દ્રિયાર્થેષુ રાગલોભાનુયાયિષુ ।
નિઃસ્નેહત્વં પ્રભુત્વં ચ રૂક્ષમુદ્વર્તનં તવ ॥ ૧૫॥

સંશોધ્યાનચ્છકલયા બૈન્ધવં તીર્થમઞ્જસા ।
તદ્વિરામરસસ્નાનં દેયં ચન્દ્રાર્ધમૌલયે ॥ ૧૬॥

સ્વપ્રબોધામ્બરોદારવિકસદ્વસ્ત્રઘર્ષણમ્ ।
વિનિવેશ્ય ભવત્સંવિદ્વિકારાન્વિકરામહે ॥ ૧૭॥

જ્ઞાનજ્ઞેયપરિત્યાગનગનિર્ઝરવિસ્રુતમ્ ।
પરમાનન્દદં મેઽન્તસ્તવ પાદ્યમનાબિલમ્ ॥ ૧૮॥

અમન્દાનન્દનિઃષ્યન્દસ્પન્દમન્દિરકન્દરાત્ ।
ગલત્કૈવલ્યસલિલમાદત્સ્વાચમનં વિભો ॥ ૧૯॥

પ્રક્ષાલ્ય ધારણામ્ભોભિર્ગ્રન્થિપઞ્ચકમૌક્તિકમ્ ।
અનર્ઘ્યમર્ઘં પાદેભ્યઃ પ્રયચ્છામિ વૃષાકપે ॥ ૨૦॥

તુરીયોદ્યાનવિકસત્સંવિત્સૌરભનિર્ભરૈઃ ।
ગિરીશ તિસૃભિર્વાગ્ભિઃ સ્તુતિપુષ્પૈઃ પ્રપૂજ્યસે ॥ ૨૧॥

પ્રાણવહ્નિશિખાસ્ત્રેણ ભઙ્ક્ત્વા બ્રહ્મબિલં લસત્ ।
ધૂપવર્તિનિભાભાસો ધૂપસ્તે નગજાધવ ॥ ૨૨॥

અનાહતા નદત્યન્તર્યા ગૌર્ધામ્નિ પરે પરા ।
સા ઘણ્ટા વાદ્યતે શમ્ભોરગ્રે ગ્રન્થાર્થ ગર્ભિણી ॥ ૨૩॥

કન્દાનલોલ્લસચ્છક્તિશિખાં દીપશિખોપમામ્ ।
ઉદ્દીપયામિ ભગવન્મોહધ્વાન્તાપનુત્તયે ॥ ૨૪॥

વૃત્તિત્યાગામૃતકલાચન્દ્રશ્ચન્દ્રકિરીટિનઃ ।
સમાલમ્ભનવેવાસ્તુ મુમુક્ષૂણાં વિમુક્તયે ॥ ૨૫॥

નાદશક્ત્યુદિતં ધામ મલત્રયવિવર્જિતમ્ ।
ઉષ્ણીષમસ્તુ તે રુદ્ર વિદ્રાવિતનભોઽર્ગલમ્ ॥ ૨૬॥

ભવદ્ભક્તિસુધાસારસમ્પ્લાવિતહૃદમ્બુધેઃ ।
પ્રોલ્લસદ્બ્રહ્મકમલમમલં તેઽસ્તુ શેખરમ્ ॥ ૨૭॥

બોધારવિન્દસન્દોહો હર હારલતા તવ ।
નિત્યોદિતાન્તરવ્યાપ્તિકલા ચન્દ્રકલા ચ તે ॥ ૨૮॥

આકૃષ્યાર્કકરૈઃ શાક્તૈર્વિશ્વાકાશકુશેશયાત્ ।
ચિચ્ચન્દ્રામૃતનિઃષ્યન્દમાસ્વાદય જગત્પતે ॥ ૨૯॥

મન્ત્રં મનસિ તચ્છક્તૌ તાં સ્વધામ્નિ સદોદિતે ।
કૃત્વા જપવિધિં સમ્યક્ શિવાય વિનિવેદયે ॥ ૩૦॥

નિઃશેષાર્થપરિત્યાગે ગ્રહણે વામિતાદ્યુતે ।

અનાબિલાં પરાં વ્યાપ્તિં મુદ્રાં બધ્નામિ ધૂર્જટે ॥ ૩૧॥

શષ્કુલીકર્ણયોર્બદ્ધ્વા યો રાવોઽત્ર વિજૃમ્ભતે
તદ્ગીતમથ તે વાદ્યમાદ્યસમ્પુટઘટ્ટનાત્ ॥ ૩૨॥

ભવદ્ભાવરસાવેશાત્તાણ્ડવાડમ્બરોદ્ધતઃ ।
મન્ત્રાધ્વનિ નદામ્યન્તઃ કિમુ બાહ્યાર્થભાવનૈઃ ॥ ૩૩॥

અખણ્ડમણ્ડલાકારશિવતાભાવનામ્બરમ્ ।
ઉપરિષ્ટાન્મયા શમ્ભોર્વિતાનમુપકલ્પિતમ્ ॥ ૩૪॥

રેચયિત્વા કરન્ધ્રેણ ભાચક્રં હૃદયામ્બરાત્ ।
ધાર્યતે ધૂર્જટેરગ્રે ચારુચામરવન્મયા ॥ ૩૫॥

નાસાપુટકુટીકોટિવિસૃતૈઃ પ્રસૃતૈઃ પુરઃ ।
તાલવૃન્તૈરિવ વિભો વીજ્યસે હંસમારુતૈઃ ॥ ૩૬॥

સર્વાતપવિનિર્મુક્તં ભવદ્ભક્તિસુધાસિતમ્ ।
આતપત્રમથાસ્માભિર્ધાર્યતે તે મહાશય ॥ ૩૭॥

મમતામન્દુરાત્યાગાત્રૈલોક્યાકર્ષણક્ષમઃ
અહઙ્કારતુરઙ્ગસ્તે વાહનાય પ્રકલ્પિતઃ ॥ ૩૮॥

સ્વસંવિન્નન્દનાનન્દનાગવલ્લીદલોજ્જ્વલમ્ ।
સ્ફુરત્સ્પન્દેન્દુસુરભિ તામ્બૂલં તે નિવેદ્યતે ॥ ૩૯॥

ભોગ્યભોક્તૃવિભેદોત્થવાસનેન્ધનસઞ્ચયમ્ ।
અદ્વૈતાગ્નૌ જુહોમ્યન્તઃ શાઙ્કરે શ્રેયસાં નિધૌ ॥ ૪૦॥

પ્રકાશાકાશહસ્તાભ્યામવલમ્બ્યોન્મનાસ્રુચમ્ ।
ધર્માધર્મગલત્સ્નેહપૂર્ણાં વહ્નૌ જુહોમ્યજે ॥ ૪૧॥

યુષ્મદ્ધ્યાનનિશાનાથકિરણૈરુપરઞ્જિતઃ ।
અન્તર્માનવિધૌ તેઽસ્તુ ચિત્તચિન્તામણિર્મમ ॥ ૪૨॥

મોક્ષલક્ષ્મીકરામ્ભોજપાત્રે વિન્યસ્ય સંસ્કૃતામ્ ।
નિવેદયામિ ભગવન્ પ્રાણસર્વસ્વદક્ષિણામ્ ॥ ૪૩॥

સંસારવારિધેઃ સન્તઃપરં પારં તિતીર્ષવઃ ।
ચન્દ્રમૌલેઃ શ્રયન્તૂચ્ચૈર્ભાવપૂજાતરણ્ડકમ્ ॥ ૪૪॥

ઇત્થમીશાનચરણનુતેર્યત્સમુપાર્જિતમ્ ।
શ્રેયસ્તેન જગત્કૃત્સ્નં દ્વેષદોષાદ્વિમુચ્યતામ્ ॥ ૪૫॥

સ્તોત્રં ગૃહાણ પરમેશ્વર વિશ્વસાક્ષિન્
માનાવમાનમમતોજ્ઝિતચિત્તવૃત્તેઃ ।
મત્તસ્ત્વદઙ્ઘ્રિયુગપીઠનિલીનમૌલેઃ
ભસ્માવગુણ્ઠિતતનોર્નૃકપાલપાણેઃ ॥ ૪૬॥

મહાપાશુપતોદ્યાને કશ્ચિદ્વિશ્રમ્ય તાપસઃ ।
ચક્રે વિચિચ્ચક્રનાથસ્ય શમ્ભોર્ભાવનુતિં પરામ્ ॥ ૪૭॥

॥ ઇતિ શ્રીચક્રપાણિનાથ વિરચિતં ભાવોપહારસ્તોત્રં સમ્પૂર્ણમ્ ॥

ગુરુક્રમવન્દનમ્ -
અદૃષ્ટવિગ્રહાગતં મરીચિચક્રવિસ્તરમ્ ।
અનુગ્રહૈકકારણં નમામ્યહં ગુરુક્રમમ્ ॥

Encoded and proofread by Aaditya Kalyanaraman

---

*Bhavopaharah*

pdf was typeset on November 10, 2023

Please send corrections to *sanskrit@cheerful.com*